Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 3 | ISSN : 2581- 6306

# भारतीयसंस्कृतौ शब्दप्रयोगवैशिष्ट्यम्

Dr. Ganeshwar NathJha
Eklavya Campus, Agartala, Central Sanskrit University

**Article Info**

**Publication Issue :**
May-June-2023
Volume 6, Issue 3

**Page Number :** 47-51

**Article History**
Received : 20 May 2023
Published : 30 June 2023

**शोधसारांशः**:- भारतीयज्ञानपरम्परायामस्माकमाचार्यैस्तादृशानां शब्दानां प्रयोगः कृतो वर्तते ये शब्दास्तात्पर्यविषयीभूतानर्थान् न व्यभिचरन्ति किञ्च व्यञ्जनया लोकोपकारकान् अन्यान् अपि अर्थान् प्रतिपादयन्ति। तादृशाः शब्दाः साहित्यव्याकरणन्यायादिषु शास्त्रेषु कुत्र प्रयुक्ता इति अस्मिन् निबन्धे सोदाहरणं मया प्रत्यपादि। किञ्च उत्तरोत्तराचार्याभिप्रेते अर्थे पूर्वपूर्वाचार्याणां तात्पर्यं भवतीत्यपि सदृष्टान्तं मया प्रस्तुतं वर्तते । विशेषतः लक्षणग्रन्थेषु आचार्यैः प्रयुक्तानां शब्दानां वैज्ञानिकरीत्या सन्निवेशो वर्तते। शब्दसन्निवेशस्य एतादृशी पद्धतिरस्माकं भारतीयज्ञानपरम्परायामेवोपलभ्यते। अस्माकमाचार्याणामिमाम्पद्धतिमवलोक्याधुनिकवैज्ञानिकाः विशेषतः संगणकविदः संगणकस्य कृते महान्तमुपयोगमावीक्ष्य इमां रीतिमनुसर्तुम्प्रयासरताः वर्तन्ते ।

**मुख्यशब्दाः**– संगणकविदः, शब्दः, संस्कृतिः, व्याकरणम्, शास्त्रम्, साहित्यम्, व्यञ्जना, लक्षणग्रन्थः।

प्रवृत्तित्वावच्छिन्नं प्रतीष्टसाधनत्वप्रकारककृतिसाध्यत्वप्रकारकज्ञानयोः समुदितयोः कारणत्वं सुविदितमेव विदुषामत एव चन्द्रानयनं मदिष्टसाधकमितीष्टसाधकत्वप्रकारकज्ञानसत्वे अपि कृतिसाध्यत्वप्रकारकज्ञानस्याभावाच्चन्द्रानयने न प्रवृत्तिर्दृश्यते एवमेव विषसम्पृक्तान्नभोजने न प्रवृत्तिस्तत्र कृतिसाध्यत्वप्रकारकज्ञानस्य सत्वे अपीष्टसाधनत्वप्रकारकज्ञानस्याभावात्। एतन्मूलकमेव **"लोके प्रयोजनमनुद्दिश्य मन्दोपि न प्रवर्तत"** इति प्रवादः। भारतीयसंस्कृतौ इष्टे प्रवृत्तिरनिष्टान्निवृत्तिरित्येषो हि प्राणिनां नैसर्गिकस्स्वभावः।सर्वेषामिष्टं सुखमेव अतः सर्वे अपि प्राणिनः सुखमेव कामयन्ते न दुःखम्। किन्तु स्वकल्पितस्य सर्वस्याप्युपायस्य दुःखजनकत्वादन्तोगत्वा दुःखमेवावाप्नुवन्ति। यदि केनचिल्लौकिकोपायेन किञ्चित्सुखं प्राप्तं चेत् तत्सुखं न शाश्वतम्, अपितु क्षणिकमेवातो नानादुःखेभ्यः प्राणिन उद्धर्तुं परमकारुणिकाः महर्षयः शास्त्राणि रचयामासुः। तेषु शास्त्रेषु सुखप्राप्तये अनेकानुपायान् प्रादर्शयन्। ते उपाया एव लोकान् आश्रित्य संस्कृतिरूपेण प्रसिद्धिं गताः।अतः भारतीयसंस्कृतेः शास्त्रमूलकत्वात् प्रामाणिकत्वं नित्यत्वं सदा श्रेयस्करत्वाद् वैज्ञानिकत्वाच्च सनातनत्वमन्यसंस्कृत्यपेक्षया प्रचीनत्वञ्च वर्तते। अनेके पाश्चात्यविद्वांसः भारतीयसंस्कृतेः वैशिष्ट्यं मुक्तकण्ठेन प्रतिपादिवन्तः सन्तीति भवन्तो विदन्त्येव अतः अस्मिन् विषये इह शोधनिबन्धे पिष्टपेषणनं कर्तुमहं नेच्छामि। अथेदानीं प्रकृतमनुसरामि। लोककल्याणायास्माकं महर्षयः उपायबोधकवाक्यप्रयोगे येषां येषां शब्दानां प्रयोगमकुर्वन् ते शब्दाः तात्पर्यविषयीभूतानर्थान् बोधयन्तः अपि भृशं वैशिष्ट्यमादधते। तथाहि परेषामर्थप्रतिपत्तिर्हि शब्दप्रयोगस्य मुख्यं प्रयोजनम्। स्वात्मस्थान् विचारान् परान् बोधयितुं वक्ता

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

शब्दानुपादत्ते। विश्वस्मिन् विश्वे यावान्नपि व्यवहारो ज्ञानगोचर: स सर्वोऽपि शब्दाश्रित एव भवति। लोके सर्वमपि ज्ञानं शब्दं विषयी करोत्येव। अत एवोक्तं भर्तृहरिणा –

**न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं, सर्वं शब्देन भासते।।**

किम्बहुना व्यवहारसमर्थचेष्टादिकमपि शब्द एवान्तर्भवति। वयं हि तादृशचेष्टया तदर्थबोधकान् शब्दाननुमाय व्यवहारे प्रवर्तामहे। चेष्टाशब्दयोरस्ति कश्चन अव्यभिचारसम्बन्ध:, अतएव यदा चेष्टया प्रतिपादयिषितोऽर्थो नावबुध्यते तदा शब्दा उपादीयन्ते। यत्र च प्रयुक्तैश्शब्दैरर्थो नावगम्यते तत्र चेष्टया संकेतेन वार्थोवगम्यते। इन्द्रियातीतोप्यर्थ: शब्देन प्रकाशयितुं शक्य:। एवञ्च शब्दस्य प्रत्यक्षपरोक्षातीतानागतसकलपदार्थबोधकत्वात् सर्वप्रमाणातिशयितत्वं वर्तते। आप्तोपदेशभूतशब्द एव प्रमाणम्। स च शब्द: साधुरेव। अत: साधुभिश्शब्दैरेवार्थो ज्ञातव्यो नाऽसाधुभि:। शब्दापशब्दयोरर्थवाचकत्वाविशेषेऽपि प्रक्रियाज्ञानपूर्वकशब्दप्रयोगेणैव धर्मप्राप्ते: सिद्धान्तिततत्वात् शब्दानां साधुत्वज्ञानमावश्यकम्, अतो दिव्यदृष्टयो योगिन: पाणिन्यादय: योगदृशा सकलशास्त्रलोकस्थशब्दान्, किम्बहुना परमात्मस्वरूपमपि साक्षात्कृत्य साधुशब्दान् परमात्मस्वरूपञ्च परिचाययितुं कांश्चन शब्दान् शब्दसमूहात्मकानि वाक्यानि वा प्रयुञ्जते। तानि वाक्यानि तत्तत्पदार्थानुगतधर्मबोधकत्वात् लक्षणानि इत्युच्यन्ते।तदाधारेण वयं साधुशब्दस्वरूपं परिचिनुम:। अत एव वयं लक्षणैकचक्षुष्का: स्म:। लक्ष्यमभिव्यप्यैव लक्षणम्भवेदिति नियम:किन्त्वलक्ष्यं नातिव्याप्नुयादिति त्वावश्यकमेव। अत एव लक्षणप्रवर्तनात् प्राग् यावल्लक्ष्यस्वरूपज्ञानमपेक्षितम्।परिमितमतीनामस्माकं तन्न सम्भवति, लक्ष्याणामनन्तत्वात् विप्कृष्टत्वाच्च। अस्माभिस्तु पुरत: स्थितानि कानिचिल्लक्ष्याणि साक्षात्कृत्य तत्सादृश्येनान्यान्यपि सम्भाव्य तदनुगततया लक्षणानि क्रियन्ते। यथा मुनित्रयातिरिक्तै: दीक्षितनागेशप्रभृतिभि: प्रकृतिप्रत्ययार्थवत्वादीनां लक्षणानि कृतानि। अत एव तत्तल्लक्षणे अव्याप्त्यतिव्याप्ती अपि सम्भाव्येते। तन्निवृत्तये परिष्कारा: क्रियन्ते पुनस्तत्र दोषशंकायां परिष्कारान्तरमित्येवं रीत्या वस्तुन:(लक्ष्यस्य) निष्कृष्टं स्वरूपं लभ्यते। परिष्काराणामियं पद्धति: भारतीयचिन्तनधाराया: विश्वस्य कृते अत्युत्तममवदानमस्ति। इयं परिष्कारपद्धतिरनादिकालतो वर्तते इति भारतीयवाङ्मयपरिशीलनेन ज्ञायते। तद्यथा शब्दसाधुत्वज्ञानाय पाणिनिना प्राय: चतु:सहस्रं सूत्राणि प्रणीतानि तेष्वन्यतमं येन विधिस्तदन्तस्येति सूत्रम् इदं च समासप्रत्ययविधौ अतिव्याप्तमतस्तन्निवृत्तये वार्तिककृता समासप्रत्ययविधौ प्रतिषेध:इत्यनेन येन विधिस्तदन्तस्य इति लक्षणस्य परिष्कार: कृत:। पुन: वार्तिककारकृतपरिष्कारे अपि उगिद्वर्णग्रहणे अतिव्याप्तिसम्भवात् तत्र दोषवारणाय स्वयमेव उगिद्वर्णग्रहणवर्जमिति परिष्कारान्तरं कृतम्। विचाराणामियमेव परम्परा शतकोटि: इत्यभिधीयते। अत्र हि विचारपराकाष्ठा द्रष्टुं शक्यते। वस्तुनो निष्कृष्टं निर्दोषं स्वरूपमवगन्तुं केन क्रमेण विचार: करणीय इति अस्यामेव पद्धतौ ज्ञातुं शक्यते। अस्माकमाचार्यैस्तादृशीयं पद्धतिराविष्कृता यया विषये परिशील्यमाने मनागपि अर्थसन्देहस्याजायमानत्वात् असन्देहार्थं चाऽध्येयं व्याकरणमिति सन्देहप्राग्भावरूपस्य प्रयोजनस्य सिद्धिर्जायते। इयं परिष्कारपद्धति: काश्यामाविर्भूता महामहोपाध्यायबालशास्त्रिचरणानामध्यापनपरम्परायाम्।अत्र पद्धतौ तादृशशब्दानां सन्निवेशो भवति ये अर्थान् न व्यभिचरन्ति।तत्रत्यै: स्वनामधन्यै: पदवाक्यप्रमाणपारावारीणैरस्मद्विद्यागुरुभि श्रीपुरुषोत्तमत्रिपाठिचरणैरियं पद्धति:पोषिता पालिता परिवर्धिता च। अनयैव पद्धत्या शतश: छात्रान् अध्यापितवन्त:। अस्या:विचारपरम्पराया:वैशिष्ट्यमावीक्ष्याधुनातनै: वैज्ञानिकै:संगणकविज्ञै: संगणकक्षत्रेऽपि इमामाश्रयितुं प्रयत्यते, किन्तु सार्थकस्य संवादस्याऽभावात् साफल्यमितो प्रतीक्षमाणमस्ति। अत्र क्रमश: शास्त्राणां शब्दप्रयोगवैशिष्ट्यविषये कानिचिदुदाहराणि प्रस्तूयन्ते –

**व्याकरणशास्त्रे -** भगवता पाणिना प्रातिपदिकसंज्ञाविधायकम्

**"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"** चतुष्पदात्मकमिदं सूत्रं विरचितम्। प्रातिपदिकमिति संज्ञाबोधकं पदम् इतराणि च संज्ञिबोधकानि पदानि। अस्य सूत्रस्यार्थं प्रतिपदयद्भिराचार्यैः भट्टोजिदीक्षितैः सिद्धान्तकौमुद्यामुक्तं यत् "धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्" इति। अत्र प्रत्ययान्तमित्यस्य प्रत्ययान्ततदादीत्यर्थः। धातुभिन्नप्रत्ययभिन्नप्रत्ययान्ततदादिभिन्नार्थवच्छब्दस्वरूपस्य प्रातिपदिकसंज्ञा भवतीति सूत्रार्थो निष्पद्यते। अत्रेयं जिज्ञासा जायते यत् प्रकृतसूत्रे अप्रत्ययपदस्य प्रत्ययभिन्नं प्रत्ययान्ततदादिभिन्नमित्यर्थद्वयम् अभिप्रेतम्। तत्र प्रत्ययस्य प्रातिपदिकसंज्ञानिषेधार्थं प्रत्ययभिन्नमित्यंशस्याऽऽवश्यकत्वेऽपि प्रत्ययान्ततदादिपर्युदासस्य किं प्रयोजनमिति चेदत्रोच्यते - प्रत्ययान्ततदादिपर्युदासाऽभावे रामाभ्यामित्यादीनां प्रत्ययान्ततदादीनामपि प्रातिपदिकत्वापत्तौ सुपो धातुप्रातिपदिकयोरिति सूत्रेण सुपो लुगापत्तिः स्यात्, तस्मात् रामाभ्यामित्यादीनां प्रातिपदिकत्वं वारयितुम् अस्मिन् सूत्रे प्रत्ययान्ततदादिपर्युदासोऽपि स्वीकार्यः। स्वीकृते च प्रत्ययान्ततदादिपर्युदासे रामाभ्यामित्यादीनां प्रत्ययान्ततदादित्वेन प्रत्ययान्ततदादिभिन्नत्वाभावेन प्रातिपदिकसंज्ञा न भवति। अत्रेयं जिज्ञासा जायते यत् अर्थवत्सूत्रे प्रत्यान्ततदादिपर्युदासस्वीकारे किं प्रमाणम् ?प्रौढमनोरमायामाचार्यैरुक्तं प्रत्ययस्यैव पर्युदासे 'कृत्तद्धितसमासाश्च' इति सूत्रेण तद्धितान्तस्य संज्ञाविधानं व्यर्थं स्यात्। अयम्भावः-अर्थवत्सूत्रे प्रत्ययान्तपर्युदासाभावे तद्धितान्ततदादेरपि धातुभिन्नप्रत्ययभिन्नार्थवच्छब्दस्वरूपत्वात् पूर्वसूत्रेणैव प्रातिपदिकत्वे सिद्धे उत्तरसूत्रे तद्धितान्ततदादेः प्रातिपदिकसंज्ञाविधानार्थं कृतं तद्धितग्रहणं व्यर्थं स्यात् । एतदेव तद्धितग्रहणं व्यर्थीभूय पूर्वसूत्रे प्रत्ययान्तपर्युदासे भवति प्रमाणम्। स्वीकृते तु प्रत्ययान्तपर्युदासे "उपगु ङस् अण्" इत्यादितद्धितान्ततदादेः प्रत्ययान्ततदादिभिन्नत्वाभावात् पूर्वसूत्रेणाऽप्राप्तायां प्रातिपदिकसंज्ञायां तद्विधानार्थम् उत्तरसूत्रे कृतम् तद्धितग्रहणमावश्यकं भवति। नन्वत्रेदमाशङ्क्यते यत् उत्तरसूत्रे तद्धितग्रहणसार्थक्याय प्रत्ययान्तपर्युदास एव स्वीक्रियतां किमर्थं प्रत्ययान्ततदादिपर्युदासः स्वीक्रियते। किञ्च प्रत्ययान्तपर्युदासस्वीकारे समासग्रहणमपि विध्यर्थं भविष्यतीत्यपरमनुकूलम्। तथाहि प्रत्ययान्तपर्युदासाङ्गीकारे राजन् ङस पुरुष सु इति समुदायस्य प्रत्ययान्तत्वेन प्रत्ययान्तभिन्नत्वाभावात् पूर्वसूत्रेण अप्राप्तायां प्रातिपदिकसंज्ञायामुत्तरसूत्रे कृतं समासग्रहणं विध्यर्थमेव भवति । तथा च विधिनियमसम्भवे विधिरेव ज्यायानिति परिभाषया समासग्रहणस्य अनया रीत्या विध्यर्थत्वसम्भवे प्रत्ययान्ततदादिपर्युदासं स्वीकृत्य नियमार्थत्वस्वीकारो न युक्तः। किञ्च समासग्रहणस्य नियमार्थत्वे व्याकरणशास्त्रे नियमशब्देन परिसंख्यायाः ग्रहणात् तस्याश्च प्राप्तबाधानुवादाश्रुतकल्पनेति दोषत्रययुक्तत्वेन गौरवमपि स्यात्। तदपेक्षया समासग्रहणेन पूर्वसूत्रे "यस्मात्प्रत्ययविहितस्तदादेस्तदन्तस्य च ग्रहणमि"ति परिभाषया तदादिरित्यंशस्यानुपस्थितिं स्वीकृत्य समासग्रहणस्य विध्यर्थत्वकल्पनमेवोचितमिति चेदत्रोच्यते परमगार्ग्यायणः इति भाष्यकारोक्तप्रामाणिकप्रयोगसिद्ध्यर्थं प्रत्ययान्ततदादिप्रर्युदासः आवश्यकः। तथाहि परमगार्ग्यस्यापत्यमित्यर्थे परमगार्ग्यशब्दघटकगार्ग्यशब्दात् 'यञिञोश्चे'ति सूत्रेण फकि तस्य आयनादेशे परमगार्ग्यायणेति समुदायस्य प्रत्ययान्तत्वेन प्रत्ययान्तभिन्नत्वाभावात् प्रातिपदिकसंज्ञा न पूर्वसूत्रेण स्यात्, न वा उत्तरसूत्रेण। उत्तरसूत्रे देवदत्तो गार्ग्य इत्यस्य प्रातिपदिकसंज्ञावारणाय तद्धितान्ततदादेरित्यर्थस्यावश्यकत्वात्। तदादिरित्यंशस्योपस्थितिस्वीकारे तु गार्ग्य इस फक् इत्यस्यैव प्रत्ययान्ततदादित्वात् परमगार्ग्यायण इत्यस्यप्रत्ययान्ततदादिभिन्नत्वेन पूर्वसूत्रेण प्रातिपदिकसंज्ञा सिद्ध्यति। तथा च परमगार्ग्यायणेत्यस्य प्रातिपदिकसंज्ञासिद्ध्यर्थं पूर्वसूत्रे तदाद्यंशोपस्थितिरवश्यं कर्तव्येति चेदत्रोच्यते परमगार्ग्यायणः इति प्रयोगसिद्ध्यर्थं प्रत्ययान्ततदादिपर्युदासः नावश्यकः प्रत्ययान्तपर्युदास एवास्तु । कथं परमगाययणः इति प्रयोगस्य सिद्धिरिति चेदुच्यते कृत्तद्धितसमासाश्च इत्यनेन गार्ग्य ङस् फक् इति तद्धितान्ततदादेः प्रातिपदिकसंज्ञायां सुब्लुकि परमगार्ग्यायण इति रूपं सेत्स्यतीति चेदुच्यते- गार्ग्य ङस् फक् इति समुदायस्य प्रातिपदिकसंज्ञायां "सुपो

धातुप्रातिपदिकयो"रिति ङसि लुकि कृतेऽपि परमगार्ग्यायणपदस्यअप्रातिपदिकत्वाद् विभक्तेःउत्पत्तिः न स्यात् । अतः परमगार्ग्यायणशब्दस्यैव प्रातिपदिकसंज्ञा अपेक्षिता। सा पूर्वसूत्रे तदाद्यंशोपस्थितिमन्तरा न सम्भवतीति पूर्वसूत्रे प्रत्ययान्ततदादिपर्युदासोऽवश्यमङ्गीकार्यः, न च राजपुरुषस्य अपत्यमित्यर्थे राजपुरुषशब्दघटकपुरुषशब्दादपि अत इञ इत्यनेन इञ्प्रत्यये कृते राजपौरुषिरित्याद्यनिष्टानामपि प्रयोगाणां साधुत्वं राजपौरुषिरित्याद्यनिष्टप्रयोगवारणाय तु स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतापर्यात्यधिकरणात् तद्धितप्रत्ययो भवति इति नियमोऽङ्गीक्रियते। तथाहि स्वं तद्धितसंज्ञकः इञ्प्रत्ययः तस्यार्थः अपत्यं तदन्वयिता राजपुरुषपदार्थनिष्ठा, तदवच्छेदकधर्मः राजपुरुषत्वं तदविच्छिन्नवाचकता राजपुरुषशब्दनिष्ठा, तस्याः वाचकतायाः पर्याप्त्यधिकरणं राजपुरुष इति शब्दः तस्मात् राजपुरुषशब्दात् तद्धितप्रत्ययः सिद्ध्यति,न तु राजपुरुषशब्दघटकपुरुषशब्दात्। इत्थमेव परमगार्ग्यस्य युवापत्यं परमगार्ग्यायण इत्यत्र स्वं तद्धितसंज्ञकः फक्प्रत्ययः तदर्थः युवापत्यं तदन्वयिता परमगार्ग्यनिष्ठा (परमत्वविशिष्टगर्गसम्बन्ध्यपत्यनिष्ठा), तदवच्छेदकधर्मः परमगार्ग्यत्वं तदवच्छिन्नवाचकता परमगार्ग्यशब्दनिष्ठा, तस्याः वाचकतायाः पर्याप्त्यधिकरणं परमगार्ग्य इति शब्दः, तस्मात् परमगार्ग्यशब्दात् तद्धितप्रत्ययः स्यात्, न तु परमगार्ग्यायणशब्दघटकगार्ग्यशब्दात्। परमगार्ग्यशब्दघटकाद्गार्ग्यशब्दात्फक्प्रत्ययं कृत्वा परमगार्ग्यायण इति प्रयोगः न सम्पादनीयः, किन्तु पूर्वं गार्ग्यशब्दादेव फक्प्रत्ययं कृत्वा गार्ग्यायण इति प्रयोगः सम्पादनीयः। तदनन्तरं परमशब्देन कर्मधारयं कृत्वा परमगार्ग्यायण इति प्रयोगो निष्पादनीयः, एवञ्च तदाद्यंशस्योपस्थित्यभावेऽपि भाष्योक्तप्रयोगस्य सिद्ध्या तदाद्युपस्थितिः, न कार्येति चेदत्रोच्यते परमत्वस्य गर्गसम्बन्धियुवाऽपत्यविशेषणत्वे तादृशप्रयोगसम्भवेऽपि परमत्वस्य गार्ग्यविशेषणत्वे तादृशप्रयोगाऽसम्भवात्। किञ्च यञिञोश्च इति सूत्रे तदादिविधेः प्रवृत्तौ यञन्ततदादेः इञन्ततदादेश्च फक् भवतीत्यर्थस्वीकारे परमगार्ग्यशब्दघटक गार्ग्यशब्दादेव फक्प्रत्ययो भाष्यकाराणामभिप्रेतः, न तु स्वतन्त्रगार्ग्यशब्दात् । तथा च पूर्वसूत्रे तदाद्यंशस्यानुपस्थितौ पूर्वोक्तरीत्या परमगार्ग्यायण इत्यस्य प्रातिपदिकत्वं न स्यात् । अतस्तदर्थं पूर्वसूत्रे तदाद्युपस्थितिरवश्यं स्वीकार्या । नन्वेवं चेत्कथं राजपौरुषिरित्याद्यनिष्टप्रयोगाणां वारणमिति चेदत्र ब्रूमः –

एतद्भाष्यप्रामाण्यात् स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतापर्याप्त्यधिकरणात् तद्धितप्रत्ययो भवति इति नियमस्वरूपं किञ्चित्परिष्क्रियते। तथाहि प्रत्ययान्तत्वावच्छिन्नोद्देश्यताकः तद्धितप्रत्ययः स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतायाः अपर्याप्त्या यदधिकरणं तस्मादपि भवति इति। परमगार्ग्यायण इत्यत्र स्वार्थान्वयिताच्छेदकधर्मः परमगार्ग्यत्वं तदवच्छिन्नवाचकता परमगार्ग्यनिष्ठा अपर्याप्त्या यदधिकरण गार्ग्यशब्दः तस्मादपि यञन्ततदादित्वरूपप्रत्ययान्तत्वावच्छिन्नोद्देश्यताकः तद्धितप्रत्ययो भवति। राजपुरुषस्यापत्यम् इत्यत्र तु अपर्याप्त्या यदधिकरणं तस्याः वाचकतायाः पुरुषशब्दः तस्मात् अत इञ इत्यनेन विहितः तद्धितप्रत्ययो न भवति इञ्प्रत्ययस्य प्रत्ययान्तत्वावच्छिन्नोद्देश्यकत्वाभावात्। नन्वेवमपि सुबन्तात्तद्धितोत्पत्तिरितिसिद्धान्तात् दक्षस्यापत्यं दाक्षिरित्यत्र अदन्तप्रातिपदिकप्रकृतिकपष्ठ्यन्तात् सुबन्तादेव

तद्धितोत्पत्तौ अदन्तप्रातिपदिकप्रकृतिकषष्ठ्यन्तत्वस्य प्रत्ययान्तत्वस्य उद्देश्यतावच्छेदकत्वात् राजपुरुषस्यापत्यम् इत्यत्र अपर्याप्त्या – यदधिकरणं पुरुषशब्दः तस्मादपि तद्धितप्रत्ययः स्यादेवेति चेदत्रोच्यते ज्ञापकसाजात्यात् तद्धितान्तत्वव्याप्यधर्मावच्छिन्नोद्देश्यताकत्वम् इति तद्धितविशेषणं दीयते। तथा च नियमस्वरूपमित्थं निष्पद्यते तद्धितान्तत्वव्याप्यधर्मावच्छिन्नोद्देश्यताकः तद्धितप्रत्ययः स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतायाः अपर्याप्त्या यदधिकरणं तस्मादपि भवति। यञन्तत्वस्य तद्धितान्तत्वव्याप्यधर्मत्वात् तदवच्छिन्नोद्देश्यताकः यञिञोश्च इत्यनेन विधीयमानो यः फक्प्रत्ययः न सः स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतायाः अपर्याप्त्या यदधिकरणं गार्ग्यशब्दः तस्मादपि भवति। किन्तु अदन्तप्रातिपदिकप्रकृतिकषष्ठ्यन्तत्वं तद्धितान्तव्याप्यत्वधर्मः अतस्तद्धर्मावच्छिन्नोद्देश्यताकः

तद्धितेऽप्रत्ययः स्वार्थान्वयिताच्छेदकधर्मावच्छिन्नवाचकतायाः अपर्याप्त्या यदधिकरणं पुरुषशब्दः तस्मात् न भवति। तथा च भाष्यप्रामाण्यात् एवंनियमाङ्गीकारे राजपौरुषिरित्याद्यनिष्टप्रयोगाणां वारणसम्भवे प्रत्ययान्ततदादिपर्युदासोऽवश्यमङ्गीकार्यः। किञ्च प्रत्ययान्तदादिपर्युदासाभावे बहुपटुशब्दस्य प्रातिपदिकसंज्ञा न स्यात्। तथाहि – ईषदूनाः पटवः इत्यर्थे बहुपटवः इति प्रयोगस्य सिद्ध्यर्थं प्रत्ययान्ततदादिपर्युदासः अपेक्ष्यत एव। प्रत्ययान्तपर्युदासस्वीकारे बहु पटु जस् इत्यस्य प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञा न स्यात्। तेन चितः इत्यनेन जसः अकारस्य उदात्तस्वरः स्यात्। इष्टं चात्र अनुदात्तत्वं। अतः प्रत्ययान्ततदादिपर्युदासः क्रियते। तेन बहु पटु जस् इत्यस्य समुदायस्य प्रत्ययान्ततदादित्वाभावात् अर्थवत्सूत्रेण प्रातिपदिकसंज्ञायां सुब्लुकि चितः इत्यनेन उदात्तस्वरे प्राप्ते तं प्रबाध्य बहुपटुशब्दात् जसि अनुदात्तौ सुप्पितौ इत्यनेन अकारस्य अनुदात्तत्वं सिद्ध्यतीत्यपरमनुकूलम्। अतः पूर्वसूत्रे तदादीत्यंशोपस्थितिं स्वीकृत्य प्रत्ययान्ततदादिपर्युदास एव भाष्याद्यारूढः पक्ष इति एवं च एकस्यैव प्रत्ययपर्युदासस्य वैशिष्ट्यमस्माभिः दृष्टम्।

एवमेव "सिद्धे शब्दार्थसम्बन्धे" इति वार्तिके सिद्धशब्दोपादानस्य वैशिष्ट्यं वर्तते मंगलार्थप्रतिपादकत्वं विस्तरभयान्नेह प्रतिपाद्यते।

**साहित्यशास्त्रे** रमणीयार्थप्रतिपादकः शब्दः काव्यम् अत्र प्रातिपादकशब्दस्य दोषवारकत्वेन वैशिष्ट्यम्।
**न्यायशास्त्रे** यत्र यत्र धूमस्तत्र तत्र वह्निः इति साहचार्यो नियमो व्याप्तिः अत्र वाद्वयं यत्रशब्दस्य प्रयोगः व्यापकत्वरूपार्थलाभाय, एवं भारतीयसंस्कृतौ संस्कृतवाङ्मये आचार्यैः प्रयुक्तानां शब्दानां महत्वैशिष्ट्यं वर्तते।

**सन्दर्भग्रन्थसूची –**


1. पाणिन्यष्टाध्यायी, प्रकाशकः चौखम्भा–सुरभारती, वाराणसी ।
2. वैयाकरणसिद्धान्तकौमुदी, प्रकाशकः मोतीलाल–बनारसी, वाराणसी ।
3. प्रौढमनोरमा, प्रकाशकः चौखम्भा–सुरभारती, वाराणसी ।
4. महाभाष्यम्, प्रकाशकः चौखम्भा–सुरभारती, वाराणसी ।
5. रसगंगाधरः, प्रकाशकः चौखम्भा–सुरभारती, वाराणसी ।
6. तर्कसंग्रहः, प्रकाशकः शारदा पब्लिकेशन, वाराणसी ।